Chapter Name:कालातिवर्तिनी कला । *Marks :(5)*

Quest:

**प्रश्नपाठः**

प्रस्तावनाः शुद्धं वा अशुद्धं वा इति विविच्य लिखत।

1. पद्मश्री पि. के. नारायणन् नम्प्यार् महोदयः विख्यातः कथाकेलिकलाकारः भवति।

2. प्रचरणं कूटियाट्टाध्ययनस्य प्रथमं सोपानं भवति।

3. युनस्को इति अन्ताराष्ट्रसभायाः अङ्गीकारं प्रथमतया प्राप्तः केरलीयकलारूपः भवति कूटियाट्टम्।

4. कूत्त् इति द्राविडपदस्य अर्थः प्रकटनम् इति भवति।

5. कूटियाट्टस्य नाट्यसङ्केतेषु अभिनये च विदेशीयानाम् अतीवश्रद्धा भवति।

Hint:

**मूल्यनिर्णयसूचकम्**

**1. अशुद्धम् ।**

2. अशुद्धम्।

3. शुद्धम् ।

**4. अशुद्धम्।**

**5. शुद्धम् ।**

Chapter Name:कालातिवर्तिनी कला । *Marks :(5)*

Quest:

**प्रश्नपाठः**

यथोचितं योजयत।

त्यक्त्वा - वाद्योपकरणम्।

मिष़ाव् - क्त्वान्तमव्ययम्।

कूत्त् - कूटियाट्टम्।

युनस्को पुरस्कारः - प्रथमसोपानम्।

अधीतिः - नाट्यम्।

Hint:

**मूल्यनिर्णयसूचकम्।**

1. **क्त्वान्तमव्यम्** ।
2. **वाद्योपकरणम्** ।
3. **नाट्यम्**।
4. **कूटियाट्टम्।**
5. **प्रथमसोपानम्।**

Chapter Name:**कालातिवर्तिनी कला ।** *Marks :(5)*

Quest:

**प्रश्नपाठः**

कोष्ठकात् प्रश्नवाचकपदाानि स्वीकृत्य प्रदत्तानां वाक्यानां प्रश्नान् रचयतु।

(किम्, कुत्र, कः, कियत्, किमर्थं, कदा ,कति)

1. श्रीनारायणगुरुः चेम्पषन्ति ग्रामे जनिमलभत।

2. श्रीबुद्धः दृष्टानां हेतुं परिचिन्तयितुं प्रतिष्ठत।

3. येशुदेवः भाविशिष्यगणम् अचिन्तयत्।

4. पुरीतः कोणार्क् पर्यन्तं मार्कि 32 कि.मि दूरम् अवर्तत।

5. आयुर्वेदे प्रातः ब्राह्मे मुहूर्ते उत्थानं करणीयम् इति अनुशासति।

**Hint:**

**मूल्यनिर्णयसूचकम्**

उचितरीत्या प्रश्नलेखनम्।

**Chapter Name:कालातिवर्तिनी कला ।** *Marks :(7)*

**Quest:**

**प्रश्नपाठः**

अधोदत्तं जीवनचरितांशं पठित्वा रूपरेखां (Profile) पूरयत।

विख्यातसंस्कृतपण्डितः अनुग्रहीतकूटियाट्टकलाकारः च भवति श्री माणिमाधवचाक्यार् महाभागः। महानुभावोऽयं चाक्यार् कूत्त् कलायाम् अपि स्वकीयप्रभावं प्रकटितवानासीत्। अभिनयप्रकारे एवं नाट्यशास्त्रे अपि निष्णातः आसीदयम्। कलाकारोऽयं विष्णुशर्मणःसावित्र्याः च पुत्रत्वेन 1899 तमे वर्षे कोषिक्कोट् जिल्लायां जनिमलभत। अस्य पत्नी श्रीमती पि.के. कुट्टिमालुनङ्यारम्मा आसीत्। विख्यातकूटियाट्टकलाकारः पद्मश्री पि. के.नारायणन् नम्प्यार् महाभागः अस्य महात्मनः पुत्रः आसीत्। 1990 तमे वर्षे पालक्काट् देशे ओट्टप्पालं जनपदे मणिमाधवचाक्यार् मृत्युमुपगतः।

नाम : ————.

जननं : ————

पितरौ : ————

भार्या : ————

पुत्रः : ————

कर्मरङ्गम् : ————.

देहवियोगः : ————

**Hint:**उचितलेखनम्।

**Chapter Name:कालातिवर्तिनी कला ।** *Marks :(8)*

**Quest:**

**प्रश्नपाठः**

रूपरेखां पठित्वा जीवनचरितं रचयतु।

नाम - पद्मश्री कलामण्डलं शिवन् नम्पूतिरि।

जननम् - 1990

जन्मस्थलम् - पालक्काट् जिल्लायां , षोर्णूर् देशे

विद्याभ्यासः- केरलकलामण्डले

पुरस्काराः - पद्मश्री, केरलसङ्गीतनाटक -अक्कादमी पुरस्कारः, मार्गी सुवर्णमुद्रा, नाट्यकलारत्नः।

प्रमुखचलचित्राणि - कलियच्छन्, कूटियाट्टे कैलासोद्धारणम् , बालिवधम्।

कर्ममण्डलम् - कूटियाट्टकलाकारः, कलामण्डले अध्यापकः।

**Hint:**

**मूल्यनिर्णयसूचकम्**

उचितरीत्या लेखनम्।

**Chapter Name:कालातिवर्तिनी कला ।** *Marks :(6)*

**Quest:**

**प्रश्नपाठः**

सुप्रसिद्धकूटियाट्टकलाकारः श्री कलामण्डलं शिवन् नम्पूतिरिमहाभागः संस्कृतसभायाः उद्घाटनाय आगतः, तेन सह अभिमुखाय (साक्षात्काराय) उदाहरणानुसारं त्रीन् प्रश्नान् रचयतु।

उदा- भवतः इष्टतमः विनोदः कः?

1................................?

2................................?

3..................................?

**Hint:**

**मूल्यनिर्णयसूचकम्**

उचितानां प्रशनानां रचना

**Chapter Name:कालातिवर्तिनी कला ।** *Marks :(9)*

**Quest:**

**प्रश्नपाठः**

सूचकानि उपयुज्य कूटियाट्टमधिकृत्य टिप्पणीं लिखत।

सूचकानि-

(नाट्यमित्यर्थः, संस्कृतरूपकाणि, चतुर्विधाभिनयः, संस्कृत-प्राकृत- कैरलीभाषाः, स्त्रीणां पुरुषाणां च मेलनं , मिषाव् ,इटक्का, कुषित्तालम्)

अथवा

कूटियाट्टमधिकृत्य संस्कृतरूपकाभिनयस्य सविशेषताः लिखत।

सूचनाः

( द्विसहस्रवर्षेभ्यः पूर्वम् आरब्धं, पौराणिकता, सजीवता, संस्कृताभिनयप्रकारः, चतुर्विधाभिनयमेलनं, युनस्को अङ्गीकारः, स्त्रीपुरुषपात्राणां मेलनं, अधीतिबोधाचरणाद्यानि सोपानानि।)

Hint:

**मूल्यनिर्णयसूचकम्**

विषयज्ञानाय 3

लेखनसामर्थ्याय 3

वाक्यघटनायै 3

**Chapter Name:कालातिवर्तिनी कला ।** *Marks :(10)*

**Quest:**

**प्रश्नपाठः**

एकेन वाक्येन वाक्यद्वयेन वा उत्तरयत।

1. कूटियाट्टस्य सविशेषताः काः?

2. कूटियाट्टात् ऋते संस्कृतकलारूपाः के?

3. किमर्थं कूटियाट्टमिति पदम् उपयुज्यते?

4. केरलेषु कूटियाट्टं पठितुं कुत्र अवसरः अस्ति?

5. कूटियाट्टप्रयोगस्य चत्वारि सोपानानि कानि?

**Hint:**

उचितोत्तरलेखनम्।

**Chapter Name:कालातिवर्तिनी कला ।** *Marks :(8)*

**Quest:**

**प्रश्नपाठः**

कोष्ठकात् समुचितमुत्तरं निर्धार्य लिखत।

1. केरलीयसंस्कृतरूपकाभिनयः भवति............।

(कथाकेलिः, कृष्णनाट्टम्, कूटियाट्टम्)

2. अधः प्रदत्तेषु सुप्रसिद्धकूटियाट्टकलाकारः कः?

(कलामण्डलं गोपि, पद्मश्री पि.के. नारायणन् नम्प्यार्, कलामण्डलं गोविन्दः)

3. युनस्को इति अन्താराष्ट्रसभायाः अङ्गीकारं प्रथमतया प्राप्तः केरलायकलारूपः कः?

(कूटियाट्टं, कथाकेलिः, ओट्टन् तुल्लल्)

4. कूटियाट्टे ......... रूपकाणि अधुनापि अभिनीयन्ते।

(मलयालम्, हिन्दी, संस्कृतम्)

5. कूटियाट्टप्रयोगस्य चतुर्षु सोपानेषु अन्यतमो भवति ..........

(अधीतिः , अभ्यासः, प्रकटनम्)

6. कूत्त् इति द्राविडपदस्य अर्थः कः?

(कथा, नाट्यं, आस्वादनम्)

7. कूटियाट्टस्य वाद्येषु प्रमुखः कः?

( मिषाव्, चेण्डा, वीणा)

8. कः गणे नान्तर्भवति?

(भरतवाक्यं, केलिकोट्टु ,मुटियक्कित्ता)

Hint:

**मूल्यनिर्णयसूचकम्**

**1. कूटियाट्टम् ।**

**2. पद्मश्री पि.के. नारायणन् नम्प्यार्।**

**3. कूटियाट्टम्।**

**4. संस्कृतम् ।**

**5. अधीतिः ।**

**6. नाट्यम्।**

**7. मिषाव् ।**

**8. केलिकोट्टु।**

Chapter Name:**कालातिवर्तिनी कला ।** *Marks :(8)*

Quest:

**प्रश्नपाठः**

उदापरणानुसारं संश्लिष्टपदानि विश्लेषयत।

उदा - स्वस्त्यस्तु - स्वस्ति+ अस्तु।

1.इत्यस्ति -

2.अप्यस्तु -

उदा - रूपकाण्येव - रूपकाणि +एव।

3.पुष्पाण्येव -

4.कर्मण्येव -

उदा - कदैवम् - कदा+ एवम्।

5.सदैवम् -

6.तदैवम् -

उदा - अधीतिरिति - अधीतिः +इति

7.कविरिति -

8.सृष्टिरिति -

Hint:

**मूल्यनिर्णयसूचकम्**

**1. इति +अस्ति।**

**2. अपि+ अस्तु।**

**3. पुष्पाणि +एव।**

**4. कर्मणि +एव।**

**5. सदा+ एवम्।**

**6. तदा +एवम्।**

**7. कविः +इति।**

**8. सृष्टिः +इति।**